अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# प्राचीनकाले धनुर्वेदस्य प्रामाणिकता तद्वैशिष्ट्यञ्च

**डॉ.नारायणप्रसादभट्टराई,**

धनुर्वेदप्राचीनभारतीयविज्ञानस्यैका सुदृढा सुप्रसिद्धा च वेदशाखाऽस्ति। इदानीम् एतच्छाखान्तर्गताः ग्रन्थाः लुप्तप्रायाः सन्ति। अस्याः विद्यायाः लोपकारणत्वात् भारतदेशस्य महती क्षतिः सञ्जाता। साम्प्रतं न कोऽपि दृश्यते अर्जुनसदृशो धनुर्धरो यस्य बाणघातेन भीष्मपितामहेनाऽप्युक्तमासीत्- **कृन्दन्ति मम गात्राणि माघमासे गवामिव। अर्जुनस्य इमे बाणा नेमे बाणाः शिखण्डिनः**[१] भीष्मः बाणपीडामनुभूय निश्चितमिमे बाणा अर्जुनस्यैव भवितुमर्हन्ति न तु शिखण्डिनः। यतो हि एतैः बाणप्रहारेण मम गात्रः तथैव कृन्दति यथा माघमासे इन्द्रियाणि अतिशैत्येन कृन्दन्ति। धनुर्वेदस्य गुरुपरम्पराया आदौ प्रवर्तकः साक्षात् सदाशिव एव। भगवान्शिवस्य शिष्यः परशुरामोऽभूत्। धनुरादौ भगवतः साम्बसदाशिवेन धारितं नामासीद् पिनाकः। धनुर्वेदस्वरूपविषये इदं सुप्रसिद्धम्- **एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धनुर्धरः। ततो यान्त्यरयो दूरान्मृगाः सिंहगृहादिव**[२]**।**

**तत्र चतुष्टयपादात्मके धनुर्वेदे प्रथमपादे दीक्षाप्रकारः, द्वितीयपादे सङ्ग्रहः, तृतीयपादे सिद्धप्रयोगः, चतुर्थपादे प्रयोगविधानम्।** एवं प्रकारेणाऽस्मिन्नुपवेदे गुरुशिष्यपरम्परायां भगवद्रामचन्द्र-लक्ष्मण-द्रोणाचार्य-अर्जुन-कर्णादयः सुप्रसिद्धाः धनुर्धरा अप्यभूवन्। मानवनाङ्कृते चतुर्हस्तपरिमापोत्तमधनुः। अनेन प्रकारेण यजुर्वेदस्य एकोनत्रिंशदध्याये अश्वमेधयज्ञप्रकरणे धनुः स्तूयते - **धन्वनां धनुषा कृत्वा वयं गोः धेनूः जयेम। धन्वना आजिं मार्गं जयेम। अजन्ति गच्छन्ति यस्मिन्नसौ वाजि मार्गः तीव्रा उग्राः समदः सङ्ग्रामदन् धन्वना जयेम। धनुः शत्रोरपकामं मनोरथभावं कृणोति करोति। किञ्च धन्वना सर्वाः प्रदिशो जयेम।**[३] ईदृशोऽस्ति धनुस्वरूपः। अस्मिन्शोधपत्रे भगवान्सदाशिवः यां रहस्यमयीं धनुर्विद्यां परशुरामायोवाच तामेव सम्प्रवक्ष्यामि। अत एव अस्य वेदस्य ज्ञानं न देयं क्रूराय-कुबुद्धये-कृतघ्नायाऽशान्ताय-गुरुद्रोहिणेऽभक्तायेति। ब्रह्मचारिणः धर्मतः प्रजापालकराज्ञा यद्दुष्टदण्डविधारिणे साधुसंरक्षणाय धनुर्देयमिति भावः। नायं प्रश्नोत्तररूपो ग्रन्थः। धनुः पुरा युद्धकाले सर्वश्रेष्ठमस्त्रमासीद्।

---

[१] महाभारतम्, भीष्मपर्व ।

[२] धनुर्वेद-प्रथमोऽध्यायः।

[३] यजुर्वेदे एकोनविंशदध्यायः ।

अग्निपुराणे शूद्रवर्णसङ्करयोरपि युद्धस्याधिकारः प्रदत्तः; युद्धाधिकारः शूद्रस्य स्वयं व्यापादिशिक्षया। देशस्थैः सङ्करैः राज्ञः कार्य्या युद्धे सहायता।[४] धनुर्वेदे ब्राह्मण एव गुरुरित्युक्तम्।

दुष्टदस्युचोरादिभ्यः साधुसंरक्षणं धर्मतः प्रजापालनं च धनुर्वेदस्य प्रयोजनमिति। अस्मिन् वेदे सप्तयुद्धानि स्वीकृतानि सन्ति। तेषु च -

**धनुश्चक्रं च कुन्तं च खड्गं च छुरिकां गदा ।**
**सप्तमं बाहुयुद्धं स्यादेवं युद्धानि सप्तधा ॥**[५]

सप्तयुद्धेषु निष्णाताऽऽचार्यो ज्यौतिषशास्त्रानुसारेण शुभमुहूर्त्ते दानहोमादिकं कृत्वा सुरान् सन्तर्प्य ब्राह्मणान् कुमार्यश्च भोजयित्वा वस्त्राऽलङ्कारभूषणैरन्नपानादिभि आचार्यं पूजयित्वा कृतोपवासः धृताजिनपरिग्रहः बद्धाञ्जलिपुटः शिष्य आचार्यं धनुः याचेत, आचार्यः वेदविधानतो मन्त्रैः मन्त्रयित्वा शिष्याय धनुर्विद्यायाः शिक्षां दद्यात्। शिष्यः तद्धनुः गृहीत्वा फलहीनं वृक्षमादौ पुष्पवेधं कुर्यात्। अनेनैव प्रकारेण रामरावणयुद्धेऽपि धनुषः शराणां प्रयोगः सम्यक्तया द्रष्टुं शक्यते। ऋग्वेदे चतुर्थमण्डले षड्त्रिंशताऽध्याये प्रथमकण्डिकायामुल्लिखितमस्ति - **'हे रैभव ! त्वया यस्य रथस्य निर्माणं कृतं तस्मिन्रथे अस्त्राणां शस्त्राणां तथा धुर्यादिकानाञ्च न काप्यावश्यकता वर्तते। पादत्रययुक्तः प्रशंसनीयोऽयं रथो मरुन्मण्डले विभ्रमते। हे रैभव ! त्वया एव गौरवमय आविष्कारः कृतः। त्वया रथनिर्माणं कृत्वा स्वीय-तेजोमयीशक्तिरभिवर्द्धिता। रथनिर्माणेन द्युलोकं भूलोकं धनयुक्तं दार्ढ्यं च कुरु। रैभवनामको देवविशेषः त्वं प्रखरबुद्धियुक्तः। यस्मिन् रथे अश्वानां सारथिनां च आवश्यकता न वर्तते, तादृशं त्वया रथनिर्माणं कृतम्।**[६]

रामायणे पुष्पकनामकविमानस्य मनोरमवर्णनमस्ति। यस्य विषये सर्वैः ज्ञायते, यत् आधुनिकभारते महाराजपृथिवीराजचौहानपर्यन्त शब्दवेधकबाणस्य प्रचलनप्रथाऽसीत्। शब्दं श्रुत्वैव पृथिवीराजेन मुहम्मदगौरिर्हतः। प्राचीनसमये शस्त्रैः सह विषकन्यायाऽपि प्रयोग आसीद्। परमाधुनिकविज्ञानयुगे एतादृशीविषकन्यायाः समानमेव मानवविस्फोट (मानवबम) इत्यस्य प्रयोगो दरीदृश्यते। आधुनिकविज्ञानेन बहूनि शस्त्राणि निर्मितानि सन्ति। लोके तेषां तु 'बम 'नाम्ना इति व्यवह्रियते। तेषु मध्ये रैन्वोबम-परमाणुबम-मानवबम-मिसाइल-राकेटलॉन्चर-तोप-टैंक-स्वचालितवायुयानशस्त्र-आग्नेयगिरि-गोलिकादयः सन्ति।

---

[४] अग्निपुराणम् द्विशतोत्तर-एकोनपञ्चाशदध्यायः।
[५] धनुर्वेद-अध्यायप्रथमः, श्लोकाष्टमः।
[६] ऋग्वेदः ७.७७.६-३ तथा च १०.१२०.१-१०

प्राचीनकाले प्रत्येकदेवविशेषस्य वाहनयानायुधान्यपि पृथक्-पृथग् आसन्। देवताविशेषेण यथा भगवतः विष्णोः सुदर्शनचक्रम्, देवाधिदेवमहादेवस्य त्रिशूलम् पाशुपतास्त्रञ्च, इन्द्रस्य वज्रः, देव्याः खड्गः, वरुणस्य नागपाशः, रामस्य बाणः, बलरामस्य हलः, परशुरामस्य कृपाणः, भीमस्य गदा, अर्जुनस्य शरः, यमस्य दण्ड आसीत्।

प्राचीनकाले ब्रह्मास्त्रं, पाशुपतास्त्रम्, अग्निवर्षास्त्रं, नारायणास्त्रम् इत्यादीनि अनेकानि अस्त्रशस्त्राणि विख्यातानि आसन्। वर्त्तमानपरिप्रेक्षे भारतोऽपि परमाण्वस्त्रानुसन्धानप्रयोगकार्यक्रमस्य कृते अमेरिकया सह सहयोगसन्धिकर्तुम् अग्रसरो वर्तते, परन्तु अणुशस्त्रस्य प्रयोगेन कस्यापि लक्ष्यस्य सिद्धिर्भवितुं न शक्नोति। किन्तु तस्योपयोगेन अणूर्जायाः विश्वस्य भौतिकमौलिकविकासं कर्तुं शक्यते। प्राचीनकाले मन्त्रैः सह अस्त्रशस्त्रस्य प्रयोग आसीत्। यथा ब्रह्मास्त्राऽनुसन्धाने आचमनादिकं कृत्वा प्रयोग-विधानमासीत्। आदौ क्षात्रकोशव्याकरणसूत्राण्यध्येतव्यानि। द्वावेवाध्यायौ सप्तमाऽष्टमौ मनोर्मिताक्षरा-व्यवहाराध्यायश्च जयार्णवविष्णुयामलविजयाख्यस्वरशास्त्रपराणि च पठितव्यानि ततः सरहस्यं धनुर्वेदं प्रपठेत् ।[७]

अतः प्राचीनकाले शस्त्राणामध्ययनमध्यापनमासीत् सुव्यवस्थितपरम्परया इति विज्ञायते। रणे मृते सूर्यमण्डलं द्युलोकं वा प्राप्यते जिते कीर्तिश्च धरणीतले। उक्तं च - **धर्मार्थं यस्त्यजेत्प्राणान्किं तीर्थैश्च जपैश्च किम् ? मुक्तिभागी भवेत् सो वै निरयं नाधिगच्छति॥ ब्राह्मणार्थे गवार्थे वा स्त्रीणां बालवधेषु च । प्राणत्यागपरो यस्तु स वै मोक्षमवाप्नुयात्॥**[८]

धनुर्विद्यायाः ग्रहणं कथं विधेयमिति स्पष्टतया निगदितम्-पवित्रभूमौ धनुःस्थापयेत्, ततः धनुषं तोलयित्वा केन प्रकारेण धनुः शिक्षा ग्रहणीया इत्याह- प्राथम्येन द्विजः स्वस्तिकेन आसनेन प्रणामं कुर्यात् ततः दक्षिणहस्तेन वामहस्ते धनुः गृह्णीयात्। कुब्जाभ्यां भुजाभ्यां धनुः गृहीत्वा तत्र पुङ्खसमन्वितं स सुन्दरबाणं योजयेत्। एवमेव विलक्ष्यमपि तद्बाणं तत्रैव सुसंस्थिरं कृत्वा ततस्तु आवश्यकतां पूरयेत् तूणात् दक्षिणपाणिना बाणं समुद्धरेत्। एवं कर्मयोगविधानज्ञः सम्यग् ज्ञात्वा निर्दिष्टविधीनां पालनं कुर्यात्। यः मनसा चक्षुषा दृष्ट्या योगशिक्षुः भवति स यममपि जेतुं प्रभविष्यति। बाणाभ्यासावसरे अधिकमाभ्यग्रहणम्, ऊर्ध्वकमधरम्, कुब्जत्वम्, उत्तानत्वम् , चलत्वम् , अतिवैशिष्ट्यं वा न कुर्यात्। एवं प्रकारेण अनामा-मध्यमयोः गृहीत्वा चिबुकपर्यन्तं नीत्वा वेगेन धैर्यपूर्वकं शरान् क्षिपेत्। अभ्यासप्रयोगे चोत्तमं चतुर्हस्तात्मकं धनुः। सार्धत्रयः हस्तात्मकं मध्यमः तथा त्रिहस्तं च अधः कोट्यात्मकं धनुः। पदातिनां तु त्रिहस्तात्मकमेव धनुः प्रयोक्तव्यम्। अश्वे रथे गजे च चतुर्हस्तात्मकं प्रयोक्तव्यम्। अग्निपुराणे द्विशतोत्तरैकपञ्चाशदध्याये उक्तम् - अनया रीत्या धनुर्विद्यासाधकः कीदृशो भवेदिति

[७] वसिष्ठधनुर्वेदसंहिता, शिक्षाधिकरण, प्रथमवल्लीः ।
[८] वसिष्ठधनुर्वेदसंहिता, शिक्षाधिकरण, द्वितीयवल्लीः।

विस्तरेण निरूपितम्। साधकः सर्वदा जितहस्तः, जितमूर्तिः, जितदृग्लक्ष्यः नियतां सिद्धिमासाध्य तदनन्तरं वाहनमारुहेत्। तदानीं पाशः कियत्परिमाणो भवेत् ? कथञ्च सुरक्षार्थं रथादीनां वेष्टनं करणीयं? शिक्षकैश्च तदानीं किमनुष्ठेयम् ? इत्यादिकं सर्वं नियमादिकं विस्तरेण निरूपितम्। तत्र बाणरक्षणसन्धानादिकञ्च सम्यक्तया निरूपितं विद्यते। शिक्षकेण वामहस्तेन तत्सङ्ग्रहं विधाय दक्षिणेन तदुद्धारः कार्यः। ततश्च कुण्डलाकृतिमिव विधाय मस्तकोपरि भ्रामयित्वा तूणमये चर्मवेष्टितपुरुषे क्षिपेत्। वल्गित-प्लुत-प्रव्रजिताद्यवसरेषु च समयोगविधिं कृत्वा प्रयुञ्जीत। धनुःशिक्षामादौ वामकरेण पुनः दक्षिणकरेण अभ्यसेत्। अग्निपुराणे षडङ्गुलपरिमाणतः सप्तहस्तपरिमापपर्यन्तं धनुरादौ शिक्षयेत्। बाणस्य प्रक्षेपणो द्विधा भवति। एकः तूणचर्मादिकम् अङ्गे बद्धयित्वा, द्वितीयः नवाङ्गुलदूरस्थलक्ष्यं साधयेत्। इत्याह-

**योजयेद्विविधा येन तथा त्वङ्गदतः श्रृणु । तूणचर्मावनद्धाङ्गं स्थापयित्वा नवं दृढम् ।**
**करेणादाय लगुडं दक्षिणाङ्गुलकं नवम् । उद्यम्य घातयेद्यस्य नाशस्तेन शिशोर्दृढम् ॥**[९]

एवं प्रकारेण यदा उभाभ्यां हस्ताभ्याम् अक्लेशेन धनुषा वधेत् तदा धनुःसिद्धिर्भवति। ततः वाहनरथगजादीनामारुह्य श्रमं कुर्यात्, पुनः प्रचारार्थं सन्धानमाचरेत्। प्राचीनशास्त्रावलम्बने धनुषः चर्चा ऋग्वेदेऽपि समुपलभ्यते-

**अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ । पुरा त्रिपुरविजयसमये रुद्रस्य धनुश्चापमहमातनोमि, ज्यया आततं करोमि । किमर्थं ? ब्राह्मणं द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरनिवासिनमसुरं हिंसितुं भव।**[१०] पुराणेषु प्रायः बहुषु स्थानेषु धनुषः चर्चा प्राप्यते। अग्निपुराणे धनुर्विद्यायाः पुरातनपरम्परानुसारेण वर्णनं दृग्गोचरी भवति। मन्त्रैस्सह धनुर्वेदे बहुधा आयुधानां प्रयोगविधाऽपि प्राप्यते। यथा ब्रह्मास्त्रप्रयोगे ब्रह्मगायत्रीमन्त्रस्य विपरीतक्रमेण जपङ्कृत्वा सन्धानं भवति। तथैव पाशुपतास्त्रेऽपि प्रयोगो भवति। पुरातनकालादारभ्य यावत् कालपर्यन्तं युद्धकला-स्थान-सैन्याऽयुधानि नियमादिकानि च समयानुसारेण परिवर्तितानि अभवन्। यावद्युद्धे आधुनिकानि आयुधानि (अग्निचूर्णः = तोप, बारूद) च प्रयुक्तानि तत एव युद्धे धनुः महत्ता समाप्ता। वर्त्तमानकाले गोलिकाप्रहाराय अनेकानि शस्त्राणि सन्ति। परं प्राचीनकाले धनुरेवासीदनेकानां शस्त्राणां प्रयोगार्थम्। श्रीमद्भागवतेऽपि यथोक्तमस्ति -

**सरहस्यो धनुर्वेदः सविसर्गोपसंयमः ।**

---

[९] अग्निपुराणम्, द्विशतोत्तरैकपञ्चाशदध्यायः।
[१०] ऋग्वेदः

**अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥**
**ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः ।**
**शस्त्रमिज्यास्तुतिस्तोमं प्रायश्चित्तव्यधाक्रमात् ॥**[११]
**आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः ।**
**स्थापत्यं चासृजद्वेदं क्रमात् पूर्वादिभिर्मुखैः ॥**[१२]

यजुर्वेदस्योपवेदोऽयं धनुर्वेदः। वर्त्तमानवैज्ञानिकयुगे क्षीणं जातम् अस्य वेदस्य महत्त्वम्। परं च धनुर्वेदे अनेकौषध्यादीनां वर्णनं कृतमस्ति। ग्रन्थोऽयम् अतिदुर्लभोऽस्ति। विस्तरभयान् न वच्म्यधिकम्।

विदुषां वंशानुचरः
डॉ.नारायणप्रसादभट्टराई
आचार्यः शुक्लयजुर्वेदविषये,
स्वामिनारायणवैदिक ऋषिकुलम्
शीशामझाडी, ऋषिकेशः (उत्तराखण्डम्)

---

[११] श्रीमद्भा. प्र. स्क., अ. ७/३७.४४
[१२] श्रीमद्भा. तृ. स्क., अ. १२/३७.३८